# प्रथमः पाठः

# भारतगीतकानि

संस्कृतवाङ्मये वेदोपनिषत्पुराणसाहित्येषु मातृभूमेः महिम्नः बहुशः वर्णनम् अस्ति। अथर्ववेदस्य पृथ्वीसूक्ते राष्ट्रोन्नत्यर्थं सर्वेषां साधनानां सङ्क्षेपेण निर्देशः वर्तते। राष्ट्रं न केवलं भौगोलिकं भौतिकतत्वं किन्तु भावनायाः प्राधान्यम् अपि अस्ति अतः भूमौ मातृभक्तिवत् राष्ट्रप्रेम-साहित्ये जनमानसे उद्भवति। न केवलं भूमेः किन्तु सरितः वनस्पतीन्, गिरीन्, तीर्थानि प्रत्यपि देवतुल्या श्रद्धा भक्तिः च अत्रत्यानां मनसि वरीवर्तते भारतवर्षवर्णने श्रीमद्भागवते क्षणायुषां भारते लब्धजन्मनां पुंसां स्वर्गे कल्पायुषां देवानां जन्मनः वरम् इत्युक्त्वा भारतभुवः अत्युत्कर्षं प्रतिपादितम्।

*वाजस्य नु प्रसवे मातरं महीम्*
*अदितिं नाम वचसा करामहे।*
*यस्यामिदं विश्वम्भुवनमाविवेश,*
*तस्यां नो देवः सविता धर्मं साविषत्॥ 1॥*

**अन्वयः -** वाजस्यु नु प्रसवे मातरं महीं नाम अदितिं वचसा (वयं) करामहे। यस्याम् इदं विश्वं भुवनम् आविवेश, तस्यां सविता देवः नः धर्मं साविषत्।

**शब्दार्थः -**

| | | |
|---|---|---|
| वाजस्य | - | अन्नस्य |
| प्रसवे | - | उत्पत्तौ |
| अदिति | - | नामविशेषः |
| वचसा | - | वाचा |
| करामहे | - | कुर्मः |
| विश्वम् | - | अखिलम् (जगत्) |
| आविवेश | - | प्रवेशं कृतवान्, प्राविशत् |
| साविषत् | - | प्रेरयतु |

*सत्यं बृहदृतमुग्रं दीक्षा तपो ब्रह्मयज्ञः*

*पृथिवीं धारयन्ति ।*

*सा नो भूतस्य भव्यस्यपत्नी,*

*उरुं लोकं पृथिवी नः कृणोतु ॥ 2 ॥* (अथर्ववेदे)

**अन्वयः -** सत्यं, बृहद् ऋृतम्, उग्रं, दीक्षा, तपः, ब्रह्म, यज्ञः, नः पृथिवीं धारयन्ति । भूतस्य भव्यस्य पत्नी सा पृथिवी नः उरूं लोकं कृणोतुं ।

**शब्दार्थः -**

| | | |
|---|---|---|
| सत्यम् | - | यथार्थवचनम् (शाश्वतगुणः) |
| बृहद् | - | महत् गुणविशेषः |
| ऋृतम् | - | सत्यम् |
| उग्रम् | - | तीक्ष्णम् |
| दीक्षा | - | आचरणशिक्षा |
| ब्रह्म | - | वेदः |
| भव्यस्य | - | अनागतस्य |
| उरुम् | - | विस्तीर्णम् |
| कृणोतु | - | करोतु |

*अपि स्वर्णमयी लङ्का न मे लक्ष्मण ! रोचते ।*

*जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ॥ 3 ॥* (रामायणे)

**अन्वयः -** लक्ष्मण ! अपि लङ्का स्वर्णमयी तथापि मे न रोचते (यतः) जननी जन्मभूमिश्च स्वर्गाद् अपि गरीयसी (भवति) ।

**शब्दार्थः-** गरीयसी - महीयसी

*गायन्ति देवाः किल गीतकानि,*

*धन्यास्तु ते भारतभूमिभागे ।*

*स्वर्गापवर्गास्पदहेतुभूते,*

*भवन्ति भूयः पुरुषाः सुरत्वात् ॥ 4 ॥* (विष्णुपुराणे)

**अन्वयः -** देवाः गीतकानि किल गायन्ति (यत्) ते पुरुषाः सुरत्वात् धन्याः (ये) स्वर्गापवर्गास्पदहेतुभूते भारतभूमिभागे भूयः भवन्ति ।

**शब्दार्थः -**

| | | |
|---|---|---|
| अपवर्गः | - | मोक्षः |
| आस्पदं | - | स्थानम् |

*अहो अमीषां किमकारि शोभनम्,*

*प्रसन्नमेषां स्विदुत स्वयं हरिः ।*

*यैर्जन्म लब्धं नृषु भारताजिरे,*

*मुकुन्दसेवौपयिके, स्पृहा हि नः ॥ 5 ॥* (श्रीमद्भागवते)

**अन्वयः -** अहो अमीषां किं शोभनम् अकारि, स्विदुत एषां हरिः स्वयं प्रसन्नः (जातः) यैः मुकुन्दसेवौपयिके भारताजिरे नृषु जन्म लब्धम्। नः स्पृहा हि।

**शब्दार्थः -** स्विदुत - अथवा

अजिरे - प्राङ्गणे

औपयिके - उपायरूपे

स्पृहा - इच्छा

*कल्पायुषां स्थानजयात्पुनर्भवात्,*

*क्षणायुषां भारतभूजयो वरम् ।*

*क्षणेन मर्त्येन कृतं मनस्विनः,*

*संन्यस्य संयान्त्यभयं पदं हरेः ॥ 6 ॥ (श्रीमद्भागवते)*

**अन्वयः-** कल्पायुषां पुनर्भवात् स्थानजयात्, क्षणायुषां भारतभूजयो वरम्। मनस्विनः क्षणेन मर्त्येन कृतम्। (यतः मनस्वी) संन्यस्य हरेः अभयं पदं संयान्ति।

**शब्दार्थः -** संयान्ति - गच्छन्ति

*न यत्र वैकुण्ठकथासुधापगा,*

*न साधवो भागवतास्तदाश्रयाः ।*

*न यत्र यज्ञेशमखा महोत्सवाः,*

*सुरेशलोकोऽपि न वै स सेव्यताम् ॥ 7 ॥ (श्रीमद्भागवते)*

**अन्वयः -** यत्र वैकुण्ठकथासुधापगा न, (यत्र) तदाश्रयाः भागवताः साधवः न, यत्र यज्ञेशमखा महोत्सवा न, स सुरेशलोकोऽयं न सेव्यताम्।

**शब्दार्थः -** सुधापगा - अमृतनदी

तदाश्रयाः - भगवदाश्रयाः

## अभ्यासः

1. **एकपदेन उत्तरत-**

क. (वयं) वचसा कां करामहे ?

ख. भूतस्य भव्यस्य का पत्नी ?

ग. हरेः पदं कीदृशम् ?

घ. वैकुण्ठकथासुधापगा कुत्र नास्ति ?

ङ. कल्पायुषः कुत्र भवन्ति ?

2. **एकवाक्येन उत्तरत-**

क. इदं विश्वं कस्याम् आविवेश ?

ख. पृथिवीं के धारयन्ति ?

ग. स्वर्गादपि का गरीयसी ?

घ. भारतभूमिः कयोः आस्पदहेतुभूता ?

ङ. कीदृशी लङ्का न रोचते ?

3. **त्रिंशत्पदैः उत्तरत-**

क. भारतवर्षे जन्ममहत्त्वस्य किं कारणम् ?

ख. सुरेशलोकः केन कारणेन असेव्यो भवति ?

4. **उचितेन कोष्ठकपदेन रिक्तस्थानानि पूरयत-**

क. अहो अमीषां किमकारि.......... । (शोभनम्/पुरुषार्थम्)

ख. संन्यस्य संयान्त्यभयं पदं........... । (शिवस्य/हरेः)

ग. न मे ............ रोचते । (सीते/लक्ष्मण)

घ. न यत्र .............. महोत्सवाः । (राष्ट्रियाः/यज्ञेशमरवाः)

ङ. यैर्जन्मलब्धं................ भारताजिरे । (पशुषु/नृषु)

5. **निम्नलिखितस्य श्लोकस्य अन्वयं कुरुत-**

न यत्र वैकुण्ठकथासुधापगा,

न साधवोभागवतास्तदाश्रयाः ।

न यत्र यज्ञेशमखा महोत्सवाः,

सुरेशलोकोपि न वै स सेव्यताम् ॥

6. **अधोरेखाङ्कितशब्दान् आधृत्य प्रश्नरचनां कुरुत-**

***(कस्मात्, के, कुत्र, कस्य, केषाम्, का)***

क. जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।

ख. उरुं लोकं पृथिवी नः कृणोतु।

ग. धन्यास्तु ते भारतभूमिभागे।

घ. यैर्जन्म लब्धं नृषु भारताजिरे।

ङ. क्षणेन मर्त्येन कृतं मनस्विनः।

7. **निम्नलिखितैः अव्ययैः वाक्यानि रचयत-**

अपि, यत्र, भूयः, वरम्, किल

8. **अधोलिखितपदानां मूलधातु-लकार-पुरुष-वचनं च लिखत-**

| पदानि | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| आविवेश | ........... | ........... | ........... | ........... |
| धारयन्ति | ........... | ........... | ........... | ........... |
| सेव्यताम् | ........... | ........... | ........... | ........... |
| रोचते | ........... | ........... | ........... | ........... |
| कृणोतु | ........... | ........... | ........... | ........... |

9. **अधोलिखितपदानां प्रकृतिप्रत्ययानि लिखत -**

| पदानि | प्रकृतिः | प्रत्ययः |
|---|---|---|
| भूतस्य | ......................... | ........................... |
| गरीयसी | ......................... | ........................... |
| लब्धम् | ......................... | ........................... |
| औपयिके | ......................... | ........................... |
| संन्यस्य | ......................... | ........................... |

10. **अत्रलिखितानां पदानां सन्धिं विच्छेदं च कुरुत, नामानि च लिखत-**

सुरेशलोकः+अपि। महा+उत्सवः। संयान्ति+अभयम्।

अदितिं नाम। जन्मभूमिश्च। यैर्जन्म। धन्यास्तु।

**योग्यताविस्तारः-**

- भारतवर्षस्य सप्तपर्वतानां सप्तनदीनां सप्ततीर्थानाञ्च नामानि लिखत।
- भारतवर्षविषये विहितानां श्लोकानां सङ्ग्रहणं कुरुत।

❖ ❖ ❖

## द्वितीयः पाठः

# कः प्रियतमः

गार्गी प्रव्रज्यमानं याज्ञवल्क्यं पृच्छति अनया धनादिसम्पत्या यदि अमृतत्वं न प्राप्यते तर्हि अस्याः किं प्रयोजनम् ? याज्ञवल्क्यः समादधति धनादिना परमपदस्य प्राप्तिः कथमपि न भवति। यतः धनादिभ्यः सर्वेषां वस्तूनां प्राप्तौ सत्यामपि न तेन परमपदस्य प्रियतमस्य आत्मनः प्रत्ययो भवति। अतः आत्मा एव प्रियतमः। एवं प्रियतमस्य आत्मनः एव कामाय सर्वं प्रियं भवति धनं, कलत्रं, पुत्रादिकं च। स आत्मा श्रवणेन, मननेन, निदिध्यासनेन ज्ञायते। सर्वैः तदर्थं यतितव्यम्। यतः एतानि सर्वाणि प्राप्तव्यस्य आत्मनः सुखार्थम् एव प्रियाणि भवन्ति न तु कलत्राद्यर्थम्। पाठस्य अयमंशः ब्राह्मणग्रन्थात् सङ्गृहीतोऽस्ति।

मैत्रेयीति होवाच याज्ञवल्क्य उद्यास्यन्वा अरेऽहमस्मात्स्थानादस्मि। हन्त, तेऽनया कात्यायन्याऽन्तं करवाणीति।

सा होवाच मैत्रेयी-यन्नु म इयं भगोः सर्वा पृथिवी वित्तेन पूर्णा स्यात् कथं तेनामृता स्यामिति। नेति होवाच याज्ञवल्क्यो यथैवोपकरणवतां जीवितं तथैव ते जीवितं स्यात्। अमृता तु नाऽऽथाऽस्ति वित्तेनेति।

सा होवाच मैत्रेयी-येनाहं नामृता स्यां किमहं तेन कुर्याम्। यदेव भगवान्वेद तदेव मे ब्रूहीति।

स होवाच याज्ञवल्क्यः-प्रिया बतारे नः सती प्रियं भाषसे एह्यास्व व्याख्यास्यामि ते, व्याचक्षाणस्य तु मे निदिध्यासस्वेति।

स होवाच-न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति। न वा अरे जायायै कामाय जाया प्रिया भवत्यात्मनस्तु कामाय जाया प्रिया भवति।

न वा अरे पुत्राणां कामाय पुत्राः प्रिया भवन्त्यात्मनस्तु कामाय पुत्राः प्रिया भवन्ति। न वा अरे वित्तस्य कामाय वित्तं प्रियं भवत्यात्मनस्तु कामाय वित्तं प्रियं भवति। न वा अरे सर्वं कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवति।

आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं विदितम्।

## शब्दार्थः

| | | |
|---|---|---|
| होवाच | - | अवोचत् |
| भगः | - | धनम् (ऐश्वर्यम्) |
| द्रष्टव्यः | - | अवलोकनीयः |
| श्रोतव्यः | - | श्रवणीयः |

| | | |
|---|---|---|
| मन्तव्य: | - | मननीय: |
| मत्या | - | बुद्ध्या |
| निदिध्यासितव्य: | - | सदैव स्मरणीय: |
| कामाय | - | अभिलाषायै |
| जाया | - | पत्नी |
| ब्रूहि | - | कथय |

## अभ्यास:

**1. एकपदेन उत्तरत-**

क. क: प्रियतम: भवति ?

ख. सर्वा पृथिवी केन पूर्णा स्यात् ?

ग. पत्यु: कामाय क: प्रियो भवति ?

घ. वित्तस्य कामाय किं प्रियं भवति ?

ङ. गार्गी प्रव्रज्यमानं कं पृच्छति ?

**2. एकवाक्येन उत्तरत-**

क. आत्मा कै: ज्ञायते ?

ख. जायायै कामाय का प्रिया भवति ?

ग. सर्वस्य कामाय किं प्रियं भवति ?

घ. मैत्रेयी का आसीत् ?

ङ. कस्य दर्शनेन सर्वं विदितं भवति ?

**3. त्रिंशत्पदै: उत्तरत-**

क. आत्मा कथं ज्ञायते ?

ख. कस्य कामाय सर्वं प्रियं भवति ?

ग. अमृतत्वं कथं प्राप्यते ?

**4. सन्धिविच्छेदं कुरुत-**

| | | |
|---|---|---|
| मैत्रेय्यात्मनो | यदेव | भवत्यात्मनस्तु |
| यथैवोपकरणवतां | एह्यास्व | |

**5. समुचितपदेन रिक्तस्थानानि पूरयत-**

क. सर्वा पृथिवी................ पूर्णास्यात्। (वित्तेन, त्यागेन)

ख. प्रिया बतारे नः सती............. भाषसे। (प्रियं, सत्यम्)

ग. आत्मा वा अरे ............। (द्रष्टव्यः/कर्त्तव्यः)

घ. प्रियाबतारे नः .............. प्रियं भाषसे। (सती, सखी)

ङ. ................ कामाय पुत्राः प्रियाः भवन्ति। (पुत्राणां. पितुर्णां)

## 6. धातुवचनलकारान् लिखत-

| क्रियापदम् | धातुः | वचनम् | लकारः |
|---|---|---|---|
| ब्रूहि | | | |
| भाषसे | | | |
| भवति | | | |
| स्यात् | | | |
| स्याम् | | | |

## 7. मेलनं कुरूत-

| | |
|---|---|
| पत्युः कामाय | सर्वं प्रियम् |
| जायायै कामाय | द्रष्टव्यः |
| वित्तस्य कामाय | जाया |
| आत्मा | वित्तम् |
| सर्वस्य कामाय | पतिः |

## 8. विभक्तिवचनं च लिखत-

| वित्तेन | विभक्तिः | वचनम् |
|---|---|---|
| तेन | ...................... | ...................... |
| पत्युः | ...................... | ...................... |
| कामाय | ...................... | ...................... |
| पुत्राणाम् | ...................... | ...................... |

## 9. अधोलिखितेभ्यः सुबन्तपदानि चेतव्यानि-

वित्तस्य, करवाणि, स्याम्, वित्तेन, जायायै, भवति

## 10. अधोलिखितेभ्यः तिङ्न्तपदानि चेतव्यानि-

स्यात्, भगः, तेन, अस्ति, वेदं, ब्रूहि

## योग्यताविस्तारः-

- आत्मप्राप्तिः कथं सम्भवतीति सङ्क्षेपेण वर्णयत।
- 'कः प्रियतमः' इति पाठस्य कथां स्वभाषायां लिखत।

❖ ❖ ❖

# तृतीयः पाठः

## सोमप्रभा

संस्कृतस्य कथा साहित्यम् अत्यन्तं समृद्धं तत्र वेतालपञ्चविंशतिकथाः लोकप्रियाः नीतियुक्ताः । एतस्यां विक्रमादित्यं वेतालं च आधृत्य पञ्चविंशतिकथाः निबद्धाः। कथासु लालित्यं पाण्डित्यं मनोरञ्जनम् अत्यन्तं प्रभावपूर्णं गद्यमयं विद्यते । सोमप्रभा कथा ज्ञान-विज्ञान-शौर्येभ्यः गुणेभ्यः शौर्यस्य प्राधान्यम् उपस्थापयति । रोचकशैल्या लिखिता कथा अत्र प्रस्तूयते ।

ततः स त्रिविक्रमसेनो राजा शिंशपातरुं प्राप्तः तं शवमवतार्य, स्कन्धे गृहीत्वा भिक्षोः प्रति तूष्णीं प्रस्थितः मार्गे कश्चिद्वेतालस्तं शवं प्रविश्य राजानं सस्नेहमब्रवीत् । राजन् ! भाराक्रान्तोऽसि कष्टेन च मार्गमाक्रमसे । अतस्ते मनोविनोदाय कथां वर्णयामि कर्णं दत्वा शृणु ।

उज्जयिन्यां हरिस्वामीति सद्गुणो विप्रवरः पुण्यसेनस्य भूपतेः प्रधानामात्यो बभूव । तस्यानुरूपायां देवस्वामीति सच्छीलः पुत्रो जातः, तद्वच्च सोमप्रभा नाम लावण्यवती कन्यापि तस्य संभूता क्रमेण तु समुल्लसितयौवना सा विवाहयोग्याऽभवत् । तदा सा मातृमुखेन पितरं भ्रातरं च न्यवेदयत् । अहं तस्यैव कण्ठे मालामर्पयिष्यामि यः शूरो वा ज्ञानी वा विज्ञानी वा भवेत् ।

तच्छ्रुत्वा तत्पिता हरिस्वामी तादृशं वरमितस्ततोऽन्विष्यन् चिन्तां वहति । तावदेकः कुमारस्तमभ्येत्य तां सुतां ययाचे । हरिस्वामी तं पप्रच्छ । ज्ञानिनं, विज्ञानिनं, शूरं वा विहाय मत्पुत्री नान्यं वरमिच्छति । तत्तेषां मध्यात्कथय को भवानिति । कुमारस्तं प्रत्यभाषत । जानाम्यहं विज्ञानमिति । तर्हि तद्दर्शयस्वेति तेनादिष्टः सः कुमारः स्वशक्त्या गगनचरं रथं कल्पयामास । तस्मिन् रथे तं हरिस्वामिनमारोप्य, क्षणादूर्ध्वं नीत्वा च, तस्मै स्वर्गादील्लोकानदर्शयत् । ततः स हरिस्वामी निर्भरसंतुष्टः सहर्षं तस्मै विज्ञानिने स्वसुतां दातुं प्रतिज्ञाय सप्तमे दिने विवाहोत्सवं निश्चितवान् ।

अत्रान्तरं कश्चिदन्यः कुमारस्तत्पुत्रं देवस्वामिनं तु समुपेत्य तद्भगिनीमयाचत् । ज्ञानिविज्ञानिशूरेभ्यो नान्यं पति मे भगिनी वरयिष्यतीति, तेन विज्ञापितः स साभिमानं शूरोऽहमित्यवदत् । ततो दर्शितशस्त्रास्त्रकौशलाय तस्मै शूराय देवस्वामी मातुः परोक्षं स्वानुजां दातुं वचनबद्धोऽभूत् । सप्तमे दिने पाणिग्रहण संस्कारो भविष्यतीति प्रतिज्ञातवान् सः ।

तत्कालमेव कोऽपि तृतीयः कुमारो हरिस्वामिभार्यामभ्येत्य तत्सुतां याचितवान् । सा प्राह-अस्मत्कन्या तमेव वरमभिलषति यो ज्ञानी विज्ञानी शूरो वा भवतीति । एवमुक्तश्च स सविनयमुवाच-हे अम्ब ! ज्ञानवानहमस्मीति । ततः सा तस्मै भूतं भवद्भविष्यञ्च पृच्छति त्रिकालदर्शित्वे यस्य निरस्तसन्देहा साऽभवत् । सप्तमे दिने परिणयविधिमनुष्ठातुं तस्य करे दुहितृदानजलमपातयत् ।

अन्येद्युः स हरिस्वामी यथाकृतं कन्यादाननिश्चयं स्वपुत्राय भार्यायै च समाख्यातवान्। तौ च स्वकृतं कन्यादाननिश्चयं तस्मै कथयामासतुः। तयोर्भिन्नंभिन्नं वाग्दानं समाकर्ण्य सोऽपि वरत्रयनिमन्त्रणात् प्रतिज्ञाभङ्गभीरुरतीव व्याकुलोऽभवत्। अथ निर्दिष्टे विवाहदिने हरिस्वामिगृहं ज्ञानिविज्ञानिशूरास्ते त्रयोऽपि वराः समाययुः। तत्काले विचारविमर्शात्प्रागेव महदाश्चर्यमभूत्। सा सोमप्रभा कन्या सहसा विनष्टा। इतस्ततो निपुणमन्विष्यमाणाऽपि नालभ्यत। ततो हरिस्वामी ससंभ्रमं ज्ञानिनमुवाच-ब्रूहि सत्वरं दुहिता मे कुत्र गतेति ?

सोऽपि स्वनेत्रे निमील्य समाधिना सर्ववृत्तान्तं परिज्ञाय हरिस्वामिनमवदत्-'धूमशिखेन राक्षसेन सा कन्या सगूढमपहृत्य विन्ध्याटवीमध्ये निजां वसतिं नीतेति। तदाकर्ण्य हा धिक्, कथं साऽधुना प्राप्येत, विवाहश्चापि कथं सम्भवेदिति विललाप।

विज्ञानी तमाश्वासयामास। यत्र सा तव कन्या विद्यते तत्रैव युष्मान्सर्वान् क्षणान्नेष्यामीति। अनन्तरं सर्वास्त्रसंयुक्तमाकाशगामिनं रथं कृत्वा, तस्मिन्सर्वान्समारोप्य, विन्ध्याटव्यां यत्र राक्षसस्य वसतिस्तत्र तानानीतवान्। तत्र सक्रोधं स्वदुर्गान्निर्गतेन घोरदर्शनेन राक्षसेन सह सशूरो निर्भयमयुध्यत्। स्वखड्गेन सः शूरः तच्छिरश्चिच्छेद। हते राक्षसे तां सोमप्रभां गृहीत्वा ते सर्वे गगनमार्गेण स्वगृहमाजग्मुः।

हरिस्वामिगृहं सम्प्राप्य कन्येयं कस्मै प्रदातव्येति, प्रश्नो ह्युपस्थितः त्रयाणां वराणां महान् विवादश्च समुद्भुतः। ज्ञानी जगाद, नाहं चेज्जानीयां कुत्र सा गता तर्हि गूढस्थेयं कन्या कथं प्राप्येत् ? तस्मादसौ मह्यमेव प्रदेयेति। तच्छ्रुत्वा विज्ञानी सावेशमवदत्। नाहं चेद् व्योमचररथं कुर्यां तर्हि गमागमौ कथं स्याताम् तस्मान्मह्यमेवेयं देयेति। शूरोऽप्युवाच, नाहं चेत् राक्षसं रणे हन्यां, तर्हि युवाभ्यामपि कृते यत्ने कन्यामेतां क आनयेत् ? तन्मह्यमेषा देयेति। इत्येवं तेषु विवदमानेषु हरिस्वामी किमत्रकर्त्तव्यमित्युद् भ्रान्तमानसस्तूष्णीमासीत्।

एतावत् कथां वर्णयित्वा शवस्थो वेतालस्त्रिविक्रमसेनमपृच्छत्, हे राजन्! तत्कस्मै इयमत्रदेयेतिभवान्मे वदतु। यदि निर्णयं जानन्नपि न वदिष्यसि तर्हि ते मूर्धा स्फुटिष्यतीति। ततो मौनं विहाय स महीपतिस्तमेवमुवाच।

*शूराय सा प्रदातव्या येन प्राणपणोद्यमात्।*

*अर्जिता बाहुवीर्येण हत्वा तं युधि राजसम्॥*

*ज्ञानिविज्ञानिनौ त्वस्य धात्रा कर्मकरौ कृतौ।*

*सदा गणकतक्षाणौ परोपकरणे न किम् ?*

*(इति वाक्यं श्रुत्वा वेतालः निवर्तयते)*

## शब्दार्थः

| | | |
|---|---|---|
| अभ्येत्य | - | समीपं गत्वा/उपसृत्य। |
| सच्छीलः | - | शीलयुक्तः। |
| ययाचे | - | याचनां कृतवान्। |
| समाययुः | - | आगताः। |
| वसतिम् | - | आवासम्। |
| गमागमौ | - | गमनागमनम्। |
| तूष्णीम् | - | मौनम्। |
| स्फुटिष्यति | - | खण्डं खण्डं भविष्यति। |
| गणकतक्षणौ | - | गणकः तक्षन् (भविष्यद्द्रष्टारौ)। |

## अभ्यासः

### 1. एकपदेन उत्तरं लिखत्-

क. हरिस्वामी भूपतेः कः आसीत् ?

ख. शवे कः प्रविष्टः ?

ग. प्रथमकुमारस्य पार्श्वे किम् ?

घ. कन्या कस्मै दातव्यम् ?

ङ. हरिस्वामिनः पुत्रस्य नाम किम् ?

### 2. एकवाक्येन उत्तरं लिखत्-

क. वेतालः राजानं किमब्रवीत् ?

ख. हरिस्वामी कुमारं किमुक्तवान् ?

ग. सोमप्रभायाः भगिनी कुमारं किम् उक्तवती ?

घ. सोमप्रभा कीदृशं पतिमिच्छति स्म ?

ङ विवाहदिने सोमप्रभा कुत्र गता ?

### 3. त्रिचतुर्भिः वाक्यैः उत्तरत्-

क. विज्ञानी हरिस्वामिनं कथम् आश्वासयामास ?

ख. महीपतिः सोमप्रभाविवाह-विषये किं मतं प्रकटितवान् ?

**4. अस्याः कथायाः सन्देशं लिखत।**

**5. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरूत-**

क. मनोविनोदाय कथां वर्णयामि।

ख. सप्तमे दिने विवाहोत्सवं निश्चितम्।

ग. तौ च स्वकृतं कन्यादाननिश्चयं तस्मै कथयामासतुः।

घ. राक्षसेन सा कन्या सगूढमपहृत्य विन्ध्याटवीमध्ये निजां वसतिं नीतेति।

ङ. ते सर्वे गगनमार्गेण स्वगृहमाजग्मुः।

**6. सन्धिविच्छेदं कृत्वा सन्धिनाम लिखत-**

क. अतस्ते

ख. जानाम्यहम्

ग. विवाहोत्सवम्

घ. कोऽपि

ङ. तत्रैव

च. तच्छ्रुत्वा

**7. प्रकृतिप्रत्ययः पृथक् कुरूत-**

क. विहाय

ख. दातुम्

ग. प्रतिज्ञातवान्

घ. अपहृत्य

ङ. परिज्ञाय

**8. धातु लकार-पुरुष-वचनं लिखत-**

| पदानि | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| आजग्मुः | | | | |
| आसीत् | | | | |
| कल्पयामास | | | | |
| जानामि | | | | |
| आनयेत् | | | | |

## 9. वचन-विभक्तिं च लिखत-

| शब्दः | विभक्तिः | वचनम् |
|---|---|---|
| भूपतेः | | |
| कस्मै | | |
| भ्रातरम् | | |
| शूरेभ्यः | | |
| सप्तमे | | |

## 10. प्रदत्तशब्दैः वाक्यानि रचयत -

क. दत्वा

ख. अन्येद्युः

ग. सत्वरम्

घ. ज्ञानी

ङ. श्रुत्वा

## योग्यताविस्तारः-

- संस्कृतस्य कथासाहित्यस्य अध्ययनं कुरुत।

❖ ❖ ❖

## चतुर्थः पाठः

# जनपदध्वंसकारणम्



यद्यपि भगवान् धन्वन्तरिः अस्माकम् आद्यः आयुर्वैदिकः अस्ति। तथापि आचार्यचरकः सर्वाधिकः समादृतः आयुर्वैज्ञानिकः अस्ति। एष आचार्यः कनिष्कसभारत्नम् आसीत्। व्याधिहेतुः भौतिकः दैहिकश्च इति एलोपैथिक-मतम् अस्ति, किन्तु आचार्यः चरकः वदति, सर्वेषां रोगाणां मूलकारणं प्रज्ञापराधः इति। प्रज्ञापराधोनाम विषमबुद्धिः इति तस्य मतम्। यथा- समं बुद्धिर्हि पश्यति (च.सं. 11)।

एवम् आचार्यः रोगस्य मूलकारणं मानसं मन्यते। मनसि दुष्टे सति भौतिकदोषाः जायन्ते। अवश्यमेव भेषजानामपि आवश्यकता उपादेयता च वर्तते एव, किन्तु विचारदोषे पुनर्जाते रोगाणां पुनर्जन्म भविष्यत्येव। अतः बुद्धिशुद्धिः प्रथमा परमा च आवश्यकी भवति तदैव रोगाणां मूलोच्छेदो भविष्यति। पाठोऽयं चरकसंहिताश्रयात् आयुर्वेदीयहितोपदेशग्रन्थात् उद्धृतोऽस्ति।

तमुवाच भगवान् आत्रेयः-सर्वेषाम् अपि, अग्निवेश ! वाटवादीनां यद्वैगुण्यम् उत्पद्यते तस्य मूलम् अधर्मः तन्मूलं च असत्कर्म पूर्वकृतम्। तयोर्योनिः प्रज्ञापराध एव। तद् यथा, यदा वै देश-नगर-निगम-जनपद-प्रधानाः धर्मम् उत्क्रम्य अधर्मेण प्रजां वर्तयन्ति, तदाश्रितोपाश्रिताः पौरजानपदा व्यवहारोपजीविनश्च तम् अधर्मम् अभिवर्धयन्ति, ततः सोऽधर्मः प्रसमं धर्मम् अन्तर्धत्ते। ततस्तेऽन्तर्हितधर्माणो देवताभिरपि त्यज्यन्ते। तेषां तथा अन्तर्हितधर्माणाम् अधर्मप्रधानानाम् अक्रान्तदेवानाम् ऋतवो व्यापधन्ते। तेन नापो यथाकालं देवो वर्षति, न वा वर्षति, विकृतं वा वर्षति, वाता न सम्यग् अभिवान्ति, क्षितिः व्यापद्यते, सलिलानि उपशुष्यन्ति, औषधयः स्वभावं परिहार्य आपद्यन्ते विकृतिम्। तत उद्ध्वंसन्ते जनपदाः स्पृशन्त्यवहार्यदोषात्।

तथा शस्त्रप्रभवस्यापि जनपदोद्ध्वंसस्य अधर्म एव हेतुर्भवति। येऽतिप्रवृद्धलोभक्रोधमोहमनाः ते दुर्बलान् अवमत्य आत्मस्वजनपरोपघाताय शस्त्रेण परस्परम् अभिक्रामन्ति, पैरवी अभिक्राम्यन्ते। रक्षोगणादिभिर्वा विविधैर्भूतसंघैः तमधर्मम् अन्यद्वा अप्यपचारान्तरम् उपलभ्याभि हन्यन्ते।

तथाभिशापप्रभवस्य अपि अधर्म एव हेतुर्भवति। ये लुप्तधर्माणो धर्मादपेतास्ते गुरु-वृद्ध-सिद्ध-ऋषि-पूज्यान् अवमत्य अहितानि आचरन्ति। ततस्ताः प्रजाः गुर्वादिभिः अभिशप्ताःभस्मताम् उपयान्ति, प्रागेव अनेक पुरुषकुलविनाशाय, नियतप्रत्ययोपलम्भाद् अनियताश्चापरे। प्रागधि चाधर्माद् ऋते नाशुभोत्पत्तिः अन्यतोऽभूत्। आदिकालेहि अदितिसुतसमौजसोऽतिविमल-विपुल-प्रभावाः, प्रत्यक्षदेव देवर्षि-धर्म-यज्ञ-विविधानाः, शैलसारसंहतस्थिरशरीराः

प्रसन्नवर्णेन्द्रियाः, पवन-सम-बल-जव-पराक्रमाः, चारुस्फिचः अभिरूपप्रमाणाकृति-प्रसादोपचयवन्तः सत्यार्जवानृशंस्य-दान-दम-नियमतपाः उपवासब्रह्मचर्यव्रतपराः, व्यपगत-भय-राग-द्वेष-मोह-लोभ-क्रोध-शोक-मान-रोग-निद्रा-तन्द्रा-श्रम-क्लम-आलस्यपरिग्रहाश्च पुरुषा बभूवुरभितायुषः ।

तेषाम् उदारसत्त्वगुण-कर्मणाम् अचिन्त्य-रस-वीर्य-विपाक-प्रभाव-गुणसमुदितानि प्रादुर्बभूवुः शस्यानि, सर्वगुणसमुदितत्वात् पृथिव्यादीनां कृतयुगस्यादौ । भ्रश्यति तु कृतयुगे केषांचिद् अत्यादानात् साम्पन्निकानां सत्त्वानां शरीरगौरवम्, शरीरगौरवात् श्रमः, श्रमाद् आलस्यम् , आलस्याद् सञ्चयः, सञ्चयात् परिग्रहः, परिग्रहाल्लोभः प्रादुरासीत् कृते ।

ततस्त्रेतायां, लोभाद् अभिद्रोहः, अभिद्रोहाद् अनृतवचनम् , अनृतवचनात् काम-क्रोध-मान-द्वेष-पारुष्याभिघात-भय-ताप-शोक-चिन्तोद्वेगादयः प्रवृत्ताः । ततस्त्रेतायां धर्मपादोऽन्तर्धानमगमत् । तस्यान्तर्धानाद् युगवर्षप्रमाणस्य पादह्रासः । पृथिव्यादेश्च गुणपादप्रणाशोऽभूत् । तत्प्रणाशकृतश्च शस्यानां स्नेह-वैमल्य-रस-वीर्य-विपाकगुण-पादभ्रंशः ।

ततस्तानि प्रजाशरीराणि हीयमानगुणपादैः आहारविहारैः अयथापूर्वम् उपष्टभ्यमानानि अग्निमारुतपरीतानि प्राग्व्याधिभिः ज्वरादिभिः आक्रान्तानि अतः प्राणिनो ह्रासम् अवापुः आयुषः क्रमशः इति ।

## शब्दार्थः

| | | |
|---|---|---|
| अनृतवचनम् | - | असत्यवचनम् |
| पादह्रासः | - | चतुर्थांशह्रासः |
| वैगुण्यम् | - | विकृतिः |
| प्रज्ञापराधः | - | बुद्धिकृतापराधः |
| उत्क्रम्य | - | उल्लङ्घ्य |
| वै | - | निश्चयार्थकम् अव्ययम् |
| अवमत्य | - | अवमाननं कृत्वा |
| भस्मतामुपयान्ति | - | नश्यन्ति |
| प्रागेव | - | पूर्वमेव |
| प्रसभम् | - | बलपूर्वकम् |
| व्यापद्यन्ते | - | नश्यन्ति |
| अवहार्यः | - | अपवार्यः |
| अपेतरः | - | रहितः |

## अभ्यासः

### 1. एकपदेन उत्तरत-

क. वैगुण्यस्य मूलं किम् ?

ख. कदा धर्मपादोऽन्तर्धानमगमत् ?

ग. जनपदोद्ध्वंसस्य कः हेतुः ?

घ. कस्मात् लोभः प्रादुरासीत् ?

ङ. कस्य अन्तर्धानाद् युगवर्षप्रमाणस्य पादह्रासः ?

### 2. पूर्णवाक्येन उत्तरत-

क. लोभक्रोधमोहमनाः किं कुर्वन्ति ?

ख. कस्मात् चिन्तोद्वेगादयः प्रवृत्ताः ?

ग. अभिशापप्रभवस्य किं कारणम् ?

घ. रोगाणां मूलकारणं किम् ?

ङ. विचारदोषे केषां पुनर्जन्म भवति ?

### 3. सन्धिविच्छेदं कुरुत-

स्पृश्यान्त्यवहार्यदोषात्, तदाश्रितोपाश्रिता, प्रागेव,

परोपधातः, तयोर्योनिः, प्रादुरासीत्, तस्यान्तर्धानाद्, ततस्त्रेतायां

### 4. त्रिंशतपदैः उत्तरत-

क. चिन्तोद्वेगादयः केभ्यः प्रवृत्ताः भवन्ति ?

ख. कथं प्रकृतिः विकृतिं आपद्यते ?

ग. अधर्मेण किं किं भवति ?

घ. 'वैगुण्यस्य मूलमधर्मम्' विवेचयत।

ङ. जनपदध्वंसकारणं वर्णयत।

### 5. पाठमाश्रित्य समुचितपदेन रिक्तस्थानानि पूरयत-

क. तयोर्योनिः ................. एव। (प्रज्ञानाशः, प्रज्ञापराधः)

ख. तथाभिशापप्रभवस्यापि ................. एव हेतुर्भवति। (अधर्मः, सत्यम्)

ग. शरीरगौरवाद् ..................... । (आलस्यम्, श्रमः)

घ. अभिद्रोहात् .................... । (अनृतवचनम्, चिन्ता)

ङ. परिग्रहाद् .................. । (लोभः, सञ्चयः)

## 6. समुचितं मेलनं कार्यम्-

| | | |
|---|---|---|
| क. | लोभात् | अन्तर्धानम् |
| ख. | सञ्चयः | श्रमः |
| ग. | धर्मपादः | असत्कर्म |
| घ. | अधर्मः | परिग्रहः |
| ङ. | शरीरगौरवम् | अभिद्रोहः |

## 7. धातुलकारवचनानि लिखत-

| | क्रियापदम् | धातुः | लकारः | वचनम् |
|---|---|---|---|---|
| क. | उत्पद्यते | | | |
| ख. | त्यज्यन्ते | | | |
| ग. | व्यापद्यते | | | |
| घ. | हन्यते | | | |
| ङ. | अभूत् | | | |

## 8. धातुं प्रत्ययञ्च लिखत-

यथा - शोधः = शुध् + घञ् ।

क. क्रोधः =

ख. परिग्रहः =

ग. विकृतम् =

घ. अवमत्य =

## योग्यताविस्तारः-

- आचार्यचरकस्य ग्रन्थस्य अध्ययनं कुरुत ।

❖ ❖ ❖

**पञ्चमः पाठः**

# शिक्षाविधिः

शिक्षाविधिः इति पाठः मनुस्मृतेः सङ्गृहीतः। ज्ञानस्य शैक्षिकविधिना आदान-प्रदानमेकं पवित्रं कर्त्तव्यम् अस्ति। तदर्थं दाता प्रतिगृहीता च अधिकारिणौ भवेताम् इति अत्यावश्यकमस्ति। यथा खलु यदा क्षेत्रं निष्कण्टकम् उर्वरकयुक्तं हलफलकेन कृष्टं भवेत् तथैव बीजमपि निर्दुष्टं शुद्धं सशक्तं च भवेत्। तेन क्षेत्रे उप्तं बीजं शीघ्रं फलति सस्यं च सुम्पुष्टं भवति। एवं यथा क्षेत्रम् उर्वरकयुक्तं संस्करणयुक्तं च आवश्यकम् तथैव बीजमपि पुष्टिम् अङ्कुरणशक्तिमत् आवश्यकम् इति विचार्य मनुना छात्रेभ्यः अनुशासनं तथैव गुरुभ्योऽपि कर्त्तव्यं निर्दिष्टम्। वस्तुतः अनुशासनं कर्त्तव्यं च परस्परं पात्रभेदेन एवमस्ति यद्गुरोर्दृष्ट्या छात्राणां अनुशासनं तदेव छात्रदृष्ट्या तेषां कर्त्तव्यमस्ति। एवमेव यः उपदेशः छात्रदृष्ट्या गुरूणाम् अनुशासनं स एव गुरुदृष्ट्या गुरूणां कर्त्तव्यमस्ति। अतः उभयत्र कर्त्तव्य-बन्धनम् अनुशासनं च स्तः। अतः नात्र भेदभावस्य दृष्टिः अवगन्तव्या आधुनिकैः। अत्र पाठः एतद्दृष्टिकोणम् अवधार्य पठनीयः तदा अस्माकं कृते बहूपयोगी भवेत्, इति निष्पक्षः विचारः मनुमतेन शिक्षां प्रति छात्रहिताय अस्ति।

*उपनीय गुरुः शिष्यं शिक्षयेच्छौचमादितः।*
*आचारमग्निकार्यञ्च सन्ध्योपासनमेव च॥ 1॥*

**अन्वयः -** गुरुः शिष्यम् उपनीय आदितः एव शौचम् अग्निकार्यम् आचारं सन्ध्योपालनं च शिक्षयेत्।

**शब्दार्थः -**

| | | |
|---|---|---|
| उपनीय | - | उपनयनसंस्कार कृत्वा |
| अग्निकार्यम् | - | अग्निहोत्रकार्यम् |
| उपासनम् | - | आराधनम् |
| शौचम् | - | पवित्रताम् |

*ब्रह्मारम्भेऽवसाने च पादौ ग्राह्यौ गुरोः सदा।*
*संहत्य हस्तावध्येयं स हि ब्रह्माञ्जलिः स्मृतः॥ 2॥*

**अन्वयः -** ब्रह्मारम्भे च अवसाने गुरोः पादौ सदा ग्राह्यौ। हस्तौ संहत्य अध्येयम्। स हि ब्रह्माञ्जलिः स्मृतः।

**शब्दार्थः -** ब्रह्मारम्भे - विद्यारम्भे

ग्राह्यौ - स्वीकार्यौ

संहत्य - योजयित्वा

अध्येयम् - पठितव्यम्

ब्रह्माञ्जलिः - नमस्कारमुद्रा

स्मृतः - कथितः

*इन्द्रियाणां विचरतां, विषयेष्वपहारिषु ।*

*संयमे यत्नमातिष्ठेद्, विद्वान् यन्तेव वाजिनाम् ॥ 3 ॥*

**अन्वयः -** विद्वान्, वाजिनां यन्ता इव, अपहारिषु विषयेषु विचारताम् इन्द्रियाणां संयमे यत्नम् आतिष्ठेत् ।

**शब्दार्थः -** विचरताम् - सञ्चरताम्

विषये - भोगविषये

अपहारिषु - विषयाकर्षकेषु

आतिष्ठेत् - प्रयतेत

वाजिनाम् - अश्वानाम्

यन्तेव - नियन्त्रणकर्ता इव

*न जातु कामः कामानामुपभोगेन शाम्यति ।*

*हविषा कृष्णवर्त्मेव, भूय एवाभिवर्धते ॥ 4 ॥*

**अन्वयः -** कामानाम् उपभोगेन कामः जातु न शाम्यति (अपितु) हविषा कृष्णवर्त्मा इव भूयः अभिवर्धत एव ।

**शब्दार्थः -** जातु - सर्वथा, कदाचित्

उपभोगेन - विषयसेवनेन

हविषा - आहुत्या

कृष्णवर्त्मा इव - अग्निः इव

शाम्यति - शमनं भवति

*श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च, भुक्त्वाघ्रात्वा च यो नरः ।*

*न हृष्यति म्लायति वा, स विज्ञेयो जितेन्द्रियः ॥ 5 ॥*

**अन्वयः -** यः नरः श्रुत्वा, स्पृष्ट्वा, दृष्ट्वा, भुक्त्वा, घ्रात्वा च न हृष्यति (न) म्लायति, स जितेन्द्रियः विज्ञेयः ।

**शब्दार्थ: -** ह्ष्यति - प्रसन्न: भवति

म्लायति - क्षीण: भवति

विज्ञेय: - ज्ञातव्य:

जितेन्द्रिय: - इन्द्रियविजेता

***धर्मार्थौ यत्र न स्यातां, शुश्रूषा वापि तद्विधा।***

***तत्र विद्या न वक्तव्या, शुभं बीजमिवोषरे ॥ 6 ॥***

**अन्वय: -** यत्र धर्मार्थौ न स्यातां, वा तद्विधा शुश्रूषा अपि वा (न स्यात्) तत्र (नरे) ऊषरे शुभं बीजम् इव विद्या न वक्तव्या।

**शब्दार्थ: -** शुश्रुषा - सेवितुम् इच्छा

ऊषरे - निष्फलायाम् भूमौ

वपेत् - वपनं कुर्यात्

विधा - प्रकार:

***विद्ययैव समं कामं, मर्तव्यं ब्रह्मवादिना।***

***आपद्यपि हि घोरायां, न त्वेनामिरिणे वपेत् ॥ 7 ॥***

**अन्वय: -** ब्रह्मवादिना विद्यया एव समं कामं मर्तव्यं (किन्तु) घोरायाम् आपदि अपि एनाम् इरिणे न वपेत्।

**शब्दार्थ: -** मर्तव्यं - मरणं प्राप्तव्यम्

आपद्यपि - कष्टकाले अपि

घोरायां - भीषणे। कठिने

एनाम् - एषाम्

इरिणे - ऊषरभूमौ

***विद्या ब्राह्मणमेत्याह शेवधिस्तेऽस्मि रक्ष माम्।***

***असूयकाय मामदास्तथा स्यां वीर्यवत्तमा ॥ 8 ॥***

**अन्वय: -** विद्या ब्राह्मणम् आह (अहं) ते शेवधि: अस्मि, माम्, रक्ष, मां असूयकाय मा अदा: तथा (अहम्) वीर्यवत्तमा स्याम् इति।

**शब्दार्थ: -** असूयकाय: - ईर्ष्याग्रस्तशरीर:

मामद: - मा ददातु

स्यां - भवेयम्

शेवधि: - परिधि:

*यमेव तु शुचिं विद्यान्नियतब्रह्मचारिणम् ।*

*तस्मै मां ब्रूहि विप्राय निधिपायाप्रमादिने ॥ 9 ॥*

**अन्वय: -** तु (च) यम् एव शुचिं नियत ब्रह्मचारिणं विद्यात् तस्मै अप्रमादिने निधिपाय विप्राय माम् ब्रूहि।

**शब्दार्थ: -**

| | | |
|---|---|---|
| शुचिं | - | पवित्रम् |
| नियतम् | - | निश्चितम् |
| ब्रूहि | - | कथय |
| निधिपाय | - | स्वामिने |
| अप्रमादिने | - | सावधानपुरुषाय |

*अभिवादनशीलस्य नित्यं वृद्धोपसेविन: ।*

*चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बलम् ॥ 10 ॥*

**अन्वय: -** तस्य अभिवादनशीलस्य, वृद्धोपसेविन: आयु: विद्या, यश: बलं चत्वारि नित्यं वर्धन्ते।

**शब्दार्थ: -** उपसेविन: - सेवकस्य

*न हायनैर्न पलितैर्न वित्तेन न बन्धुभि: ।*

*ऋष्यश्चक्रिरे धर्मं योऽनूचान: स नो महान् ॥ 11 ॥*

**अन्वय: -** न हायनै: न पलितै:, न वित्तेन बन्धुभि: च न (महान् अपितु) ऋषय: धर्मं चक्रिरे (एवं) य: अनूचान: स: न: महान्।

**शब्दार्थौ: -**

| | | |
|---|---|---|
| ऋषय: | - | तपस्विन: |
| अनूचान: | - | प्राचीन: |

*श्रद्धधान: शुभां विद्यामाददीतावरादपि ।*

*अन्त्यादपि परं धर्मं स्त्रीरत्नं दुष्कुलादपि ॥ 12 ॥*

**अन्वय: -** श्रद्धधान: अवराद् अपि शुभां विद्याम् एवम् अन्त्यादपि परं धर्मं दुष्कुलाद् अपि च स्त्रीरत्नम् आददीत।

**शब्दार्थ: -**

| | | |
|---|---|---|
| अवराद् | - | कुलहीनात् |
| अन्त्याद् | - | शूद्रात् |
| दुष्कुलाद् | - | हीनकुलात् |
| स्त्रीरत्नं | - | शीलसम्पन्ना स्त्री |
| आददीत | - | स्वीकुर्यात् |

## अभ्यासः

1. **एकपदेन उत्तरत-**

क. कः संयमे यत्नमातिष्ठेत् ?

ख. कः श्रुत्वा न हृष्यति ?

ग. धर्मार्थौ यत्र न स्यातां तत्र का न वक्तव्या ?

घ. कामः केन न शाम्यति ?

ङ. कः ब्राह्मणस्य शेवधिः अस्ति ?

2. **एकवाक्येन उत्तरत-**

क. कः जितेन्द्रियः भवति ?

ख. विद्या कुत्र न वक्तव्या ?

ग. गुरुः शिष्यं किं शिक्षयेत् ?

घ. चत्वारि कस्य वर्धन्ते ?

ङ. कुत्र यत्नमातिष्ठेत् ?

3. **त्रिशत्पदैः गुरुशिष्ययोः शिष्टाचारं लिखत।**

4. **त्रिंशतपदैः विद्यायाः महिमानं वर्णयत।**

(क) के विद्यायाः अधिकारिणः ? त्रिंशत्पदैः वर्णयत ?

5. **रिक्तस्थानानि पूरयत -**

क. गुरुः......................उपनीय शिक्षयेत्।

ख. विद्वान् ............ यत्नम् आतिष्ठेत्।

ग. कामः............. उपभोगेन न शाम्यति।

घ. यो .............. दृष्ट्वा न हृष्यति सः ............. विज्ञेयः।

ङ. विद्या ................ आह।

6. **अधोलिखितेषु पदेषु क्रियापदानि पृथक् करणीयानि-**

शिक्षयेत्, संहत्य, उपनीय, आतिष्ठेत्, हृष्यति, म्लायति, श्रुत्वा, वपेत्, अस्मि, विप्राय।

7. **अधोलिखितेषु विशेषणपदानि पृथक् करणीयानि-**

अपहारिषु, शुभं, घोरायाम्, हविषा, विप्राय, यशः, शुभाम्।

**8. अधोलिखितेषु प्रयुक्ताः प्रत्ययाः पृथक् करणीयाः-**

उपनीय, आदितः, स्पृष्ट्वा, वक्तव्या, विज्ञेयः।

**9. अधोलिखितेषु विषमं शब्दं पृथक् कुरुत-**

क. श्रुत्वा, स्पृष्ट्वा, दृष्ट्वा, भुक्त्वा, घ्रात्वा, उपनीय।

ख. शाम्यति, हृष्यति, म्लायति, आपदि, अस्मि।

ग. गुरुः, शिष्यः, विद्वान्, नरः, विद्या।

घ. असूयकाय, विप्राय, निधिपाय, विज्ञेय, अप्रमादिने।

ङ. पलितैः, वित्तेन, उपभोगेन, वर्धन्ते।

**10. अधोलिखितेषु विभक्तिं वचनञ्च प्रदर्शयत-**

| पदानि | विभक्तिः | वचनम् |
|---|---|---|
| विषयेषु | ..................... | ...................... |
| उपभोगेन | ..................... | ...................... |
| आपादि | ..................... | ...................... |
| असूयकाय | ..................... | ...................... |

**11. अधोलिखितेषु लकारं पुरुषं वचनञ्च प्रदर्शयत-**

| पदानि | लकारः | पुरुषः | वचनम् |
|---|---|---|---|
| शिक्षयेत् | ........... | ........... | ........... |
| तिष्ठेत् | ........... | ........... | ........... |
| अभिवर्धते | ........... | ........... | ........... |
| वपेत् | ........... | ........... | ........... |

**12. अधोलिखितानां पदानां वाक्ये प्रयोगं प्रदर्शयत-**

गुरुः, शिष्यः, विद्वान्, नरः, विद्या।

## 13. अधोलिखितानां समुचितमेलनं करणीयम्-

| | |
|---|---|
| विचरताम् | विद्या |
| पादौ | विप्राय |
| वक्तव्या | ग्राह्यौ |
| तस्मै | इन्द्रियाणाम् |
| अपहारिषु | आपदि |
| घोरायाम् | विषयेषु |

## योग्यताविस्तारः-

- शिक्षासम्बद्धान् अन्यान्यश्लोकान् पठत।
- पाठात् लब्धशिक्षां स्वजीवने साक्षात्कुरुत।

❖ ❖ ❖